**Nepal Sanskrit University** Symbol No.:______________

# प्राक्शास्त्री

## २०७९

**विषयः :- ऐच्छिकन्यायः**

**पत्रम् :- तृतीयम्** **समयः - २० मिनेट**

**खण्ड-क (वैकल्पिकाः सर्वे प्रश्नाः समाधेयाः)**

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** **२०x१=२०**

१. मीमांसादर्शनस्य प्रणेता कः ?
(क) जैमिनिः ☐ (ख) पतञ्जलिः ☐ (ग) कपिलः ☐ (घ) कणादः ☐

२. सांख्यदर्शने कति तत्त्वानि ?
(क) त्रयोविंशतिः ☐ (ख) चतुर्विंशतिः ☐
(ग) पञ्चविंशतिः ☐ (घ) षड्विंशतिः ☐

३. पीलुपाकवादी कः ?
(क) मीमांसकः ☐ (ख) नैयायिकः ☐ (ग) वैशेषिकः ☐ (घ) वेदान्ती ☐

४. नव्यन्यायस्य प्रवर्तकः कः ?
(क) गौतमः ☐ (ख) गंगेशोपाध्यायः ☐
(ग) जयन्तभट्टः ☐ (घ) वात्स्यायनः ☐

५. अनुमितेः करणं किम् ?
(क) प्रत्यक्षम् ☐ (ख) अनुमानम् ☐ (ग) उपमानम् ☐ (घ) शब्दः ☐

६. तदत्यन्तविमोक्षः कः ?
(क) जीवात्मा ☐ (ख) परमात्मा ☐ (ग) अदृष्टः ☐ (घ) अपवर्गः ☐

७. संस्कारः कतिविधः ?
(क) एकविधः ☐ (ख) द्विविधः (ग) त्रिविधः (ख) चतुर्विधः

८. विशेषपदार्थः कतिविधः ?
(क) चतुर्विधः ☐ (ख) पञ्चविधः ☐ (ग) षड्विधः ☐ (घ) अनेकविधः ☐

९. अनुमानं कतिविधम् ?
(क) द्विविधम् ☐ (ख) चतुर्विधम् ☐ (ग) पञ्चविधम् ☐ (घ) षड्विधम् ☐

१०. अलौकिकसन्निकर्षः कतिविधः ?
(क) द्विविधः ☐ (ख) त्रिविधः ☐ (ग) चतुर्विधः ☐ (घ) पञ्चविधः ☐

११ सादृश्यज्ञानेन किं रूपं ज्ञानमुत्पद्यते ?
(क) उपमितिज्ञानम् ☐ (ख) संज्ञासंज्ञिसम्बन्धज्ञानम् ☐
(ग) पदज्ञानम् ☐ (घ) वाक्यार्थज्ञानम् ☐

क्रमशः

१२. सिद्धान्तः कतिविधः ?
(क) द्विविधः ☐ (ख) त्रिविधः ☐ (ग) चतुर्विधः ☐ (घ) पञ्चविधः ☐

१३. न्यायावयवेषु चतुर्थः अवयवः कः ?
(क) प्रतिज्ञा ☐ (ख) हेतुः ☐
(ग) निगमनम् ☐ (घ) उपनयः ☐

१४. लिङ्गं कतिविधम् ?
(क) द्विविधम् ☐ (ख) त्रिविधम् ☐
(ग) चतुर्विधम् ☐ (घ) पञ्चविधम् ☐

१५. शब्दप्रत्यक्षजनने कः सन्निकर्षः ?
(क) संयोगः ☐ (ख) संयुक्तसमवायः ☐
(ग) समवायः ☐ (घ) संयुक्तसमवेतसमवायः ☐

१६. उपमितौ कः व्यापारः ?
(क) उपमितिः ☐ (ख) अतिदेशवाक्यार्थस्मरणम् ☐
(ग) अतिदेशवाक्यार्थज्ञानम् ☐ (घ) संज्ञासंज्ञिसम्बन्धज्ञानम् ☐

१७. न्यायभाष्यकारः कः ?
(क) गौतमः ☐ (ख) वात्स्यायनः ☐ (ग) उद्योतकरः ☐ (घ) वाचस्पतिमिश्रः ☐

१८. शब्दः कस्य विशेषो गुणः ?
(क) आत्मनः ☐ (ख) मनसः ☐ (ग) आकाशस्य ☐ (घ) कालस्य ☐

१९. परा जातिः का ?
(क) भूतत्वम् ☐ (ख) द्रव्यत्वम् ☐ (ग) सत्ता ☐ (घ) घटत्वम् ☐

२०. प्रागभावप्रतियोगि किम् ?
(क) व्यापारः ☐ (ख) कारणम् ☐ (ग) कार्यम् ☐ (घ) करणम् ☐

–: ० :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री
## २०७९

पूर्णाङ्काः - १००

विषयः :- ऐच्छिकन्यायः उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

| | |
|---|---|
| (क) | परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् । |
| (ख) | दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥ |

### खण्ड-ख

अधस्तनेषु प्रश्नेषु चतुर्दशप्रश्ना एव समाधेयाः – १४×४ = ५६

१. आस्तिकदर्शनानि कानि ? तत्प्रवर्तकाश्च के ?
२. न्यायोक्तं प्रमेयं कतिविधम् ? तद्भेदाश्च के ?
३. निर्विकल्पकप्रत्यक्षस्य सोदाहरणं लक्षणं लिखत ।
४. परामर्शस्य लक्षणं सोदाहरणं विवेचयत ।
५. यथार्थानुभवस्य लक्षणं सोदाहरणं लिखत ।
६. गुणाः कति ? के च ते ?
७. पृथिव्याः लक्षणं सपदकृत्यं लिखत ।
८. आत्मनो लक्षणं विविच्य तद्भेदः प्रदर्श्यताम् ।
९. समवायिकारणस्य लक्षणं सोदाहरणं लिखत ।
१०. 'रामस्य पिता दशरथः' इति वाक्यस्य शाब्दबोधः प्रदर्शनीयः ।
११. उपमिति-उपमानयोः मध्ये कीदृशः व्यापारः ।
१२. चक्षुषा घटत्वप्रत्यक्षे कः सन्निकर्षः ? तल्लक्षणं सोदाहरणं लिखत ।
१३. शब्दप्रमाणं यथाग्रन्थं विवेचयत ।
१४. प्रध्वंसाभावस्य लक्षणं सोदाहरणं लिखत ।
१५. सामान्यस्य लक्षणं सभेदं सोदाहरणं प्रतिपादयत ।
१६. व्याप्तेः लक्षणं स्वाधीतग्रन्थदिशा विचारयत ।
१७. बौद्धदर्शनस्य सङ्क्षेपेण परिचयः दीयताम् ।
१८. सव्यभिचारहेत्वाभासस्य स्वरूपं सोदाहरणं विलिखत ।

### खण्ड-ग

त्रयः प्रश्नाः समाधेयाः – ३×८ = २४

१९. वैशेषिकदर्शनस्य परिचयो दीयताम् ।
२०. द्रव्यस्य लक्षणं प्रतिपाद्य तद्भेदान् प्रदर्शयत ।
२१. न्यायवैशेषिकदर्शनयोः साम्यवैषम्ये प्रतिपादयत ।
२२. सविकल्पकप्रत्यक्षस्य लक्षणं सोदाहरणं विवेचयत ।
२३. षड्विधसन्निकर्षाणां स्वरूपं सोदाहरणं प्रस्तूयताम् ।

–: ० :–